

This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

M-474

कविकुलगुरु कालिदास संस्कृत विश्वविद्यालय, रामटेक

हस्तलिखित संग्रह

दाखल क्र M 474 विषय कर्मकांड

नांव कुंडसिद्धि MSS

लेखक/लिपीकार विठ्ठल दीक्षित

पृष्ठ 49

काळ — पूर्ण/~~अपूर्ण~~

M-474

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नेपवित्रकर्मा जनिब्रूवश्यामी॥ तत्सन्तु नाभि तुल दीक्षितेन भिरच्युतो मंडु
पकुंडसिद्धिः स्पष्टार्थः॥ अथ कुंडमंडपादि विरक्षः॥ नाव दृस्तादि प्र
माणं विपरीतमस्यानि कतु स्यामाह॥ कृतोर्ध्वबाहोः स्वसमभूतलतः
कर्तुः शरांशः प्रपदोच्छ्रितस्य॥ योनाभसहस्तोस्य जिनांश २४ कोपिस्यादंगु
लं तत्रद्विभांशकापि॥ ७॥ यवोयूका चलिक्षा च बालाग्रमेकुमादयः॥ कृत
मुष्टिकरो रत्निरररत्निरकनिष्ठिकः॥ ८॥ कृता नूर्ध्वबाहुपेन तया समभू
विस्तृपादतयास्थितस्य वा प्रपदपादाग्रं नेन मूलुभमार्तं योच्छ्रितस्य
कर्तुर्यजमानस्य यः पंचमांशः सहस्तः तस्यायो जिनांशकास्य दृ द्विभांश

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्तदंगुलं तत्तद्दिभाँशकाः तस्य तस्यां गुलादेर्यैदृभांशा अष्टमांशास्ते यवः
यूकालिक्षावालाग्रं एवमादयो रथरेणुप्रभृतयो भवंति ए तदुक्तं भवति
॥ अंगुलस्याष्टमांशो यवस्तस्याष्टमांशो यूका तस्या अष्टमांशो लिक्षा त
स्याष्टमांशो वालाग्रं तदष्टमांशो रथरेणुः तदष्टांशस्त्रसरेणुस्तदष्टांशः
परमाणुरिति ॥ कृतमुष्टिर्यजमानहस्तः रत्निः स एकविंशत्यंगुलात्मकः
सरत्निः अकनिष्ठकः मुक्तकनिष्ठः अरत्निः स सार्धद्वाविंशत्यंगुला
त्मको हस्त एव ॥ अरत्निहस्तयोः प्रायश अभेद एवेति व्याख्या ॥ यत्कात्या राम
यनः ॥ यजमानेनोर्ध्वबाहुना प्रपदोच्छ्रितेन समस्थितेन वेति ॥ तथापं ३

CC-0. In Public Domain. Kavikulguru Kalidas Sanskrit University Ramtek Collection

चाऽरत्निः पुरुषो दशपदो द्वादशांगुलं पदमिति ॥ तथा विंशति शतांगुलः पुरुष इति ॥ अत्र समस्थितेन प्रपदोच्छ्रितेन वेत्यर्यं कात्यायनोक्तः श्रौतो विकल्पः ॥ यतः कल्पस्य साक्षाच्छ्रुतिमूलकत्वं तुल्यार्थास्तु विकल्पेरन्निति जैमिनिः ॥ अथ पंचरात्रादिषु आचार्यहस्तकनिष्ठिकाद्यैश्च तुर्भिरेवांगुलीभिर्महर्षेर्मध्यांगुलेर्मध्यपर्वभागे तिर्यग्विसर्पद्भिरियं तु मेयेत् ॥ अत्राचार्यमानमुपादिष्टं तत्रापि व्याचिनोति ॥ अथ कर्मफलरूपानीति यास्कवाक्यबलाद्युक्तिबलात् ॥ दानवाचनान्वारंभणवरणव्रतप्रमाणेषु यजमानं प्रतीयादिति कात्यायनोक्तेश्चाचार्यो यजमान एव

कुंड अथ स्मार्त्ते कर्मणि कथं श्रौतवाक्यावसर इति नाशंक्यं ॥ यथा श्रौते प्यग्निहोत्रा सिद्धि
दौ सदोपवीतिना भाव्यं सदा बद्धशिखेन चेत्याद्यविरुद्धं स्मार्त्तमंगीक्रियते त
द्वत्स्मार्त्ते प्यस्मिन्कर्मणि श्रौतं ग्राह्यमेवेति भविष्यत्पुराणे ॥ जालांतरगते
भानौ यत्सूक्ष्मं दृश्यते रजः ॥ प्रथमं तत्प्रमाणानां त्रसरेणुं प्रचक्षते ॥ त्रसरे
णुः स विज्ञेयो येष्टौ स्युः परमाणवः ॥ त्रसरेणवस्तु ते त्वष्टौ रथरेणुस्तु सः
स्मृतः ॥ रथरेणवस्तु ते त्वष्टौ वालाग्रं तत्स्मृतं बुधैः ॥ वालाग्राण्यष्ट लिक्षा
तु यूका लिक्षाष्टकं स्मृतं ॥ अष्टौ यूका यवं प्राहुरंगुलं तु यवाष्टकं ॥ तत्रै राम
व ॥ रत्निस्त्वंगुलपर्वाणि विज्ञेयस्त्वेकविंशतिः ॥ अरत्निरेकनिष्कः सर ४

बोडशांशो विधुकरः॥ अरत्निरेव हस्तः स्मृतावभिहितः॥ अरत्निं प्र
कृत्य चतुर्विंशत्यंगुलीभिर्मिमीत इति॥ अन्यदंगुलादिमानं प्रयोक्ता त
पैषुद्दृश्यं॥ अथ कुंडमंडपोपयोगिप्राचीसाधनं विवक्षुस्तदुपयोगि
नीमितिकर्तव्यतां स्रग्धरयाह॥ ज्ञात्वा पूर्वं धरित्रीं दहनखननसंप्लाव
नैः संविशोध्य पश्चात्कृत्वा समानां मुकुरजठरवद्वाचयित्वा द्विजेंद्रैः॥
पुण्याहं कूर्मशेषौ क्षितिमपि कुसुमाद्यैः समाराध्य शुद्धे वारे तिथ्यां
च कुर्यात्सुरपतिककुभः साधनं मंडपार्थे॥ पूर्वं प्रथमतो धरित्रीं ज्ञात्वा
इयं कर्मम कुंडादिकर्तुर्योग्या अयोग्या वेति विचार्य ततो दहनखननसं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कुं ६ प्लावनादिभिः स्मृत्युक्तैः साधनोपायैश्च संशोध्य ततो गुणिजनेनबुध्या सिद्धि
वाम्बुकुरजठरवदादर्शोदरवत्समं कृत्वा द्विजैर्ब्राह्मणैः कृत्वा पुण्याहं
वाचयित्वा कूर्मशेषौ क्षितिं अपिशाब्दा वराहं पुष्पादिभिः समाराध्य पूज
यित्वा शुद्धे दिने निश्चोच्चकाराल्लग्ने मंडपार्श्वे स्करपनिर्कंकुंभः प्राच्याः सा
धनं कुर्यादिति व्याख्या ॥ यच्छास्त्रदानिके ॥ नक्षत्रराशितारायामनुकूले ल
शुभे हनि ततो भूमितले शुद्धे तुषांगारविवर्जिते ॥ पुण्याहं वाचयित्वातु
मंडपं रचयेत्कुंभमिति ॥ भूपरिक्षापं चरात्रे ॥ नवन्धभिः परीक्षेत वास्तु राम
ज्ञानविशारदः ॥ स्फुटिता च सशल्या च वल्मिकारोहिणी तथा ॥ दूरतः ५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

परिवर्ज्या भूः कर्तुरायुर्धनापहा ॥ ईशकोणप्लवा सा च कर्तुः श्रीदा सु
निश्चितं ॥ पूर्वाप्लवा हृद्धिकरी वरदा नूतरा प्लवा ॥ शेषकाष्ठाभप्लवा भू
मिर्धनायुर्गृहनाशिनी ॥ ब्राह्मणी घृतगंधा स्यात्क्षत्रिया रक्तगंधवत्
क्षारगंधा च वै वैश्या शूद्रा विड्गंधिनी क्षितिः ॥ ब्राह्मणी भूः कुशोपेता
क्षत्रिया शरसंकुला ॥ कुशकाशाकुला वैश्या शूद्रा सर्वतृणाकुला ॥ अ
निषिद्धा यथा ॥ सितापीतातथारक्ता कृष्णवर्णसमन्विता ॥ स्थिरोदकाद
ढा स्निग्धा भूमिः सर्वसुखावहा ॥ शीतस्पर्शोष्णकाले या वह्निस्पर्शा
हिमागमे ॥ वर्षासु चोभयस्पर्शा सा शुभा परिकीर्तिता ॥ हयग्रीवपंचरात्रे ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कुं ६

सुंदरीणारत्तिर्यत्रपुरुषैः सहसत्रम ॥ काश्मीरचंदनामोदकर्पूरागरुगं सिद्धि
धिनी ॥ कमलोत्पलगंधाचजातीचंपकगंधिनी ॥ पाटलामल्लिकागंधा
नागकेसरगंधिनी ॥ दधिक्षीराज्यगंधाचमदिरासवगंधिनी ॥ रक्तगंध
श्चाहिगंधाचशुक्लगंधयुतात्वपा ॥ सर्वैषामेववर्णानांभूमिःसाधार
णामता ॥ कुसुमप्रकरस्तद्वद्यस्यांनग्लानिमृच्छति ॥ ननिर्वातितथादीप
स्तोयंशीघ्रंनजीर्यति ॥ मधुराचकषायाचअम्लाचकटुकातथा ॥ कुशैः
शरैस्तथाकाशैर्दूर्वाभिर्याचसंवृता ॥ इतिप्रयोगसारे ॥ वितस्तिमात्रवि राम
स्तारंनि र्मितिवरंभुवि ॥ निक्षिपेत्तामृदस्तस्मिंस्तास्करीषासुशोभनं ॥ ६

समासु मध्यमं विंद्यान्न्यूनास्त्वधममुच्यते॥ परीक्ष्यैवं प्रयत्नेन तस्य कांभू
मिं कनीयसीं॥ अंगारतुषकेशादिहीनं कृत्वा तु भूतलं॥ वासिष्ट्यां॥ खन्य
मानेयदा कुंडे पाषाणं प्राप्यते यदि॥ तदापि मृत्यवे चास्थि केशांगारे र्ध
नक्षयः॥ भस्मना च भयं प्रोक्तं तुषैः प्रोक्ता दरिद्रता॥ शल्यज्ञानं महाक
पिलपंचरात्रे॥ प्रासादारंभकाले च गृहादौ च विशेषतः॥ शल्योद्धारस्तु
कर्त्तव्यो यदीच्छेच्छुभमात्मनः॥ प्रासादारंभकाले तु पदं गं स्पृशते पुमान्
॥ वास्तुदेहे दृढं तत्र शल्यं विद्याद्विचक्षणः॥ कंडूयति शिरः पुंसि शिरःश
ल्यं समुद्धरेत्॥ शल्यं तत्रास्थि वितस्ते पं खन्यमाने करत्रये॥ अग्निदाहस्य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कुं० द्व

चरणे धनहानिश्च जायते॥ यत्नेनोत्पाटयेच्छल्यं यदिच्छेच्छुभमात्मनः
॥ बाहुकं डूयमाने तु निर्दिशेल्लोहशृंखलं॥ हस्तद्वयनसंतिष्ठेल्लक्षणं ग
दितं तव॥ स्वामिनो मरणं विंद्याद्विदेशागमनं तथा॥ यत्नेनोत्पाटयेच्छल्यं
यादिच्छेच्छुभमात्मनः॥ ऊरुकं डूयमाने तु कांस्यशल्यं समादिशेत्॥ हस्तैन
केन संतिष्ठेल्लक्षणं गदितं तव॥ असती च भवेद्भार्या यशो हानिश्च जायते॥
हस्तोकं डूयमाने तु अस्थिलं तु विनिर्दिशेत्॥ त्रिहस्तेन च संतिष्ठेत् खन्यमा
ने च नान्यथा॥ अग्निदाहश्च रोगश्च सशल्यं मरणं भवेत्॥ पृष्ठकं डू
यमाने तु बाहुशल्यं विनिर्दिशेत्॥ सार्द्धहस्तेन संतिष्ठेन्नात्र कार्या विचारणा॥

सिद्धि
राम
७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्वामिनाशो भवेत्तत्र भार्या वा जायते सती ॥ पादौ कंडूयमाने तु हस्त शल्यं वि
निर्दिशेत् ॥ सार्द्रहस्ते न संतिष्ठेत्क्षणं गदितं तवे ॥ गोनाशो राजदंडश्च स
स्यहानिश्च जायते ॥ कुक्षौ कंडूयमाने तु पाषाणं तत्र निर्दिशेत् ॥ हस्तद्वित
यमानेन ल० ॥ भुजंगदंशास्तत्रस्यात्तस्माच्छल्यं समुद्धरेत् ॥ जानू कंडू
यमाने तु भस्म तत्र विनिर्दिशेत् ॥ हस्तद्वयेन संतिष्ठेल्ल० ॥ अग्निदाहो म
नस्तापक्लेशाद्दुःखभयानि च ॥ करोत्येवं विधं कर्म तस्मात्तद्दे समुद्धरेत् ॥
गोशृंगं पीतमंडूकशोरवशुक्तिश्च कच्छपः ॥ शंबूकश्च प्रशस्तास्तु यश्चा
न्यारत्नजातयः ॥ अंगारं च तुषं केशमस्थि शल्यं विचारयेत् ॥ वास्तुदेहज्ञा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कुं० ३

सिद्धि

नंसोमशंभौ ॥ जानुनी कूर्परासक्ते दिशि वातकृताशयोः ॥ पैत्र्यांपादपुरो
रौ ज्ञां शिरोस्य हृदयं जालिरिति ॥ इदमभीष्टभूमौ नवकोष्टं चक्रं विधाय इ
ष्टव्यं ॥ भूमिशोधनेष्वन्येपि दाहादयः संस्कारास्मृत्युक्ता अनुसंधेया वि
स्तरभयान्नात्र लिख्यंते ॥ हयग्रीवपंचरात्रे ॥ भूमिं तोयसमां कृत्वा दर्पणो
दरसन्निभामिति ॥ तत्प्रकारोस्य ज्येष्ठपुत्रकृतः ॥ सुकाष्ठपट्टी चतुरंगुलो
च्चां हस्तायतामंगुलविस्तृती च ॥ कृत्वांतरं कोलघुलं बकोंकाघृतस्ततः
पूरयसैंमृदाकुं ॥ मत्स्यपुराणे ॥ वाराहं कूर्मशेषो च क्षितिं चैव विधानतः
॥ पूजयेद्वास्तुकार्येषु विधिनासाधकोत्तम इति ॥ अथ शंकुसमत्वस्थूल

न्र

राम ८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प्राचीसाधनं च उपजातिविपरीताख्यानकीभ्यामाह ॥ नृपांगुलैः संमितकर्कटेन सूत्रेण वा वृत्तवरं विलिख्य ॥ रव्यं १२ गुलं शंकुमनुष्यमध्ये निवेशयेत्तत्र वा स्त्रि २० मितांगुलाभिः ॥ ६ ॥ चतसृभिश्चैव रज्जूत्तमाभिः संस्पृष्टशीर्षं तु समोषिकाभिः ॥ तच्छंकुमाप्य त्रिविशोदपेयाद्दृतेकमात्सो वरुणेंद्रकाष्ठे ॥ ७ ॥ नृपांगुलैः षोडशांगुलैः परिमितेन कर्कटेन सूत्रेण वा वृत्तं विलिख्य तन्मध्ये द्वादशांगुलं शंकुं दृढं सूक्ष्माग्रं स्थापयेत् ॥ कीदृशं ॥ विंशत्यंगुलमिताभिश्चतसृभिः रज्जुभिः समानाभिः शलाकाभिः कल्पितचतुर्दिग्गतदृत्तरेखास्थाभिः संस्पृष्टमस्तकं ॥ एवं शंकुसमतलं साधयित्वा तादृश

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्यशंकोः छायापूर्वाह्णे यस्मिन्प्रदेशे वृत्ते प्रविशति यत्र वृत्ताद्बहिरपराह्णे
ऽपेयात्तत्र चिह्नयोः क्रमात्प्राचीप्रतीच्यौ भवत इति व्याख्या ॥ इति सार्ध
श्लोकस्योपपत्तिः ॥ तत्र दोःकोट्योर्नामभेदो न स्वरूपभेद इति ॥ दोःकोटि
वर्गयोगपदं कर्ण इति शंकुतलाद्वृत्तरेखायां यावन्नीयमाने कोटिः १६ शंकु
र्भुजः १२ एतत्कृत्योर्योगपदं कर्णः २० वृत्तपरिधिस्पृष्टदिग्गताच्छेदकयं यावं
न्नीयमानाश्च तस्याः शलाकाः कर्णा भवंति ॥ शुष्कसमे शंकुं निखाय शंकुसं
मितया रज्वा मंडलं परिलिख्य यत्र लेखयोः शंकग्रच्छाया निप... म
तत्र शंकुं निहंतुसा प्राचीति अत्र शंकुसंमितयेत्युपलक्षणं तेन...

यापि रज्वा वृत्तं कार्यं ॥ अन्यथा पत्राक्षभाषड्गुला तत्र धनुःसंक्रांतौ द्वाद
शांगुलशंकोः छायाप्रवेशात्ता दृशो वृत्तेन स्यादेव ॥ तस्माद्दस्माभिः षोडशां
गुलसूत्रेण वृत्तं कारितं ॥ तथा वृत्ते कृते लाघवं च ॥ एकेनैव शंकुसमत्वसाध
नं दिक्साधनं च सिध्यति अत एव रामः ॥ शंकुमानाधिकव्यासदले वृत्ते वि
शेषत इति ॥ एवं स्थूलप्राचीसाधनमुक्त्वा सूक्ष्ममपि शालिन्याह ॥ कर्ककी
टगोमृगे षूकयासा द्वाभ्यां चाल्यासिंहकुंभात्रिकेपि ॥ यांवैकांबाभानुमा
न्याति तस्यां चाल्याद्वं द्वेकार्मुके चालनं न ॥ ८ ॥ सा प्राचीकर्कसंक्रांतौ वृश्चि
कसंक्रांतौ वृषसंक्रांतौ च एकया षूकया चाल्या सूर्यस्यायनवशात् ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कुं ड उत्तरायणेऽन्तरतः॥ दक्षिणायने दक्षिणतः॥ एवं सिंहवृश्चिकौ सींहकन्यातु सिद्धि
लासंक्रांतौ चक्षाभ्यां पृकाभ्यां वालनीया॥ अयनवशात्॥ मिथुनधनुःसं
क्रांतौ च चालनं नास्तीति व्याख्या॥ अत्र च॥ दृष्टे तःस्फुसमीकृते क्षितिगते
कें इस्छशंको क्रमाद्ग्राग्रं यत्र विशत्यपैति च ततस्तत्रापरं ज्योदिशो॥ तत्का
लायमजीवयोस्तु विवराद्गाकर्णमित्याहतालंबज्यात्यामितांगुलैरप
नदिश्यंद्गीस्फुटा चालितेति सिद्धांतशिरोमणिमार्गेणेति कर्त्तव्यतां विधा
यदृष्टव्यमिति॥ एवं प्राचीसाधनमुक्त्वोत्तरदक्षिणयोः पोसाधनं शालि राम
न्याह॥ रज्जुं द्विघ्नां मध्यचिह्नां सपाशां प्राचीशंकौ पश्चिमे चापि दत्वा॥ कृ १०

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

र्वह्नीमान्दक्षिणेचोत्तरेचतच्चिह्नेस्याद्दक्षिणाचोत्तरादिक्॥ ५॥ कुंडमंडपा
द्यावद्विस्तारस्तद्द्विगुणांकृतमध्यचिह्नांउभयांतयोःपाशवतींरज्जुंदृष्ट
व्यासांतेप्राचीप्रतीच्योर्ईतशंकोर्विन्यसेत्ततोमध्यांकेधृत्वारज्जुंदक्षिणो
त्तरेचापकर्षयेद्द्विद्वान्कर्षांकेदक्षिणाउत्तराचस्यादितिव्याख्या॥ अत्रस्पष्टेव
युक्तिरिति॥ अथरात्रौदिक्साधनोपायंवसंततमालिकयाह॥ निशिवाश्रवणो
दयेदिगैंद्रीगुरुभस्योदयेनेथवह्निभस्य॥ सुरवर्धिकिवापुभांतरालेप्यमु
तःसाधयपूर्ववत्त्वपाभ्यां॥ ७॥ अथवारात्रौश्रवणोदयेप्राची॥ अथवापुष्य
स्योदयेप्राची॥ अथवाकृत्तिकोदयेप्राची॥ अथवास्फराणांवार्द्धकिस्त्वष्टावापु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कुं ड स्तयोर्मध्ये यौः चित्रास्वात्योः तयोरंतराले प्राची ॥ अमुतः प्राचीतः पूर्ववद्यथोक्तमा सिद्धि
र्गेणयाम्यां दक्षिणां दिशं साधयेति व्याख्या ॥ शुल्बे कृत्तिकाश्रवणःपुष्य
चित्रास्वात्योर्यदंतरं ॥ एतत्प्राचीदिशो रूपं युगमात्रोदिते पुर इति ॥ अथ चि
त्रास्वात्योर्मध्ये प्राचीत्युक्तं तन्मध्यस्य दुर्ज्ञेयत्वात्तदुपायमनुष्टुभाह ॥ चि
त्रां विध्वैकया स्वातीमन्ययापि शलाकया ॥ तिर्यक्कंठांतरचिह्नात्तु द्विमूले
न्यास्फुटेद्दिक् ॥ ११ ॥ एकया ऋज्वा शलाकया चित्रां विध्वा अन्यया तादृश्यै
व शलाकया स्वातीं विध्वा तयोः शलाकयो रूपाग्रं दक्षिणोत्तरां मध्यां कोत्त राम
तीयां शलाकां समतया दद्यात् ॥ प्रथमद्वितीययोः शलाकयोर्मूले एकीकृ ११

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्यत्तृतीययामध्यांकात् उभयसंपातं यावत् चतुर्थीं शलाकां प्रांते रज्जु
प्रांतलंबकद्वयवतीं पूर्वापरायतां दद्यात् ॥ यत्र लंबको भूम्यां पतितो तत्र तां
कयोः पूर्वापरसूत्रदानात् स्पष्टाप्राची स्पष्टा युक्तिर्व्याख्या चेति ॥ अथ प्रका
रांतरेण लघूपायेनोदीचीसाधनमाह ॥ दिनमानदले सप्तांगुलच्छायाग्रतो
हि यत्र ॥ शंकुमूलं नीयमानं सूत्रं स्यादुत्तरा दिशा ॥ १ ॥ तिथिपत्राद्गणिता
द्वा दिनमानमेतावदिति ज्ञात्वा घटिकादिना ज्ञाते दिनार्द्धे मध्याह्ने सप्तां
गुलशंकोर्यत्र छायाग्रं लगति तस्माच्छंकुमूलं यावन्नीयमानं सूत्रं दक्षिणो
त्तरसूत्रमिति ॥ अथवा सप्तांगुलशंकोर्गणितागतमध्याह्निकच्छायातु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कुं ड

त्यानस्यैवच्छायाया यदा स्यात्तदग्राच्छंकुमूलं नीयमानं सूत्रं दक्षिणोत्तरेति॥ सिद्धि
अत्र युक्तिस्तस्मिन्समये रविर्दक्षिणोत्तरे वृत्ते भवतीति ततः पूर्ववत्पूर्वापरे
साध्ये॥ एवं दिक्साधनं विधाय मंडपकोणत्वाच्चतुःकोणसाधनं विपरी
ताख्यानक्याह॥ दिग्गतशंकुद्वयगं द्विपाशं विस्तारतुल्यं तु गुणं दलांके॥ कोणे
प्रकर्षेदिति वेदकोणेष्वेवं चतुःकोणमतीवसाधु॥ १२॥ दिग्गतयोः पूर्वद
क्षिणयोर्दक्षिणापरयोः अपरोत्तरयोरुत्तरपूर्वयोः शंकुद्वयगं द्विपाशो य
स्य तं विस्तारेण तुल्यं गुणं सूत्रं अर्धविद्धे कोणे आकर्षयेदेवं चतुर्ष्वपि राम
को[illegible]षु इति कृते साधु चतुरस्रं स्यादिति॥ अथ मंडपे विशेषं शालिन्याह॥ १२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

द्धां भूमिं मंडपस्य प्रकुर्पाद्धहस्तोन्मानामर्द्धहस्तोन्मितां वा ॥ मध्ये भूमिं
मंडपेनोन्मितां त्यक्त्वा कुर्यान्मंडपं चेद्द्वितीयः ॥ १३ ॥ मंडपस्य भूमिं हस्तो
च्छ्रायां अर्धहस्तोच्छ्रायां वा कुर्यात् ॥ चेद्द्वितीयो मंडपः कार्यो भवति तदा मंडप
९ प्रमाणपरिमितां भूमिं मध्ये त्यक्त्वा द्वितीयं मंडपं कुर्यादिति व्याख्यायत्सि
द्धांतशेखरे ॥ स्थूला दर्कांगुलोच्छ्रायं मंडपस्थलमीरितं ॥ कपिलपंचरात्रे ॥
मंडपं प्रकृत्योक्तं ॥ उच्छ्रायो हस्तमानं स्यात्स्फुसमं तु सुशोभनमिति ॥ तेन न
विकल्पोप्यं ज्ञेयः ॥ वास्तुशास्त्रे ॥ मंडपांतरमुत्सृज्य कर्त्तव्यं मंडपांतरमि
ति ॥ अथ मंडपप्रमाणं वसंततिलकयाह ॥ दश १० सूर्प १२ करोन्मितो ध्वम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कुं ६ स्यादिन १२ शाकं १४ प्रमितैः करैस्तु मध्यः ॥ धृति १८ भूप १६ करोन्मितो वरीया सिद्धि
न्नख २० हस्तोप्यथ मंडपस्तु लायां ॥ १५ ॥ दश हस्तद्वादश हस्तोधमः स्यात्
द्वादश चतुर्दश हस्तो मध्यमः ॥ षोडशाष्टादश हस्त उत्तमः ॥ तुलापुरुष
दाने विंशतिहस्तो प्युत्तमः ॥ मंडपे आयामविस्तारौ तुल्यावेवेति व्याख्या अ
त्र विस्तारायामयोरंगुलादिकं क्षिप्त्वा त्यक्त्वा वा हृषाय सिध्यर्थं पातित·
व्यं ॥ उक्तं विकर्मणा ॥ वणिक् धर्मेषु वैश्येषु मंडपे भोज्य वेश्मसु ॥ वृषं तुरं
गशालायां गोशाला गोकुलेषु चेति पंचरात्रे ॥ कनीयान्दश हस्तः स्यान्मध्य राम
मो द्वादशोन्मितः ॥ तथा षोडशभिर्हस्तैर्मंडपस्यादिहोत्तमः ॥ तथा ॥ दश द्वादश १३

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

…वद्धिर्द्धिवृध्यातततः क्रमात् ॥ लिंगपुराणे ॥ विंशद्धस्तप्रमाणेनमंडपं
…दमेव वा ॥ तथाष्टादशहस्तेनकलाहस्तेनवापुनः इति ॥ ननु द्वादश
हस्तमंडपस्यकथमध्यमत्वंमध्यमत्वंचेतिउच्यते ॥ दशहस्तापेक्षयाम
ध्यमत्वंचतुर्दशहस्तापेक्षयाकनिष्ठत्वं ॥ यथाएकस्यैवयजमानस्यकुत्र
चिज्ज्ञेष्ठत्वंकुत्रचिन्मुख्यत्वंतद्वत् ॥ दशहस्तमंडपेनवकुंडीपक्षेपंचमेख
लापक्षेचआचार्याद्युपवेशनंनसंभवतिअत्ररत्न्यरत्न्येकहस्तपरि
मितेककुंडेकमेखलापक्षएवादरणीयः ॥ औचित्याद्दर्शासारिमाणमिति
कात्यायनोक्तेः ॥ उत्तमेपिमंडपेदशहस्तकुंडनवपंचमेखलादिपक्ष

कुं० स्यसमावेशो न स्यादिति मंडपवृद्धिः कार्या ॥ यतो मंत्रमुक्तावल्यां चतुर्वि सिद्धि
शतिहस्तपर्यंतं मंडपवृद्धिः ॥ वास्तुशास्त्रे तु पंचहस्तमारभ्य द्वात्रिंशद्ध
स्तपर्यंतं वृद्धिः ॥ कर्मविशेषेणोक्ता सा चात्र विस्तरभयान्न लिख्यते इति
अथ द्वारमानं वेदीमानं चाख्यानक्याह ॥ दिगंतराले द्विकरैर्भवेद्वा श्च
तुष्टये वेद४गजांगुलै८स्तत् ॥ विवर्धितं मध्यवरिष्ठयोः स्याद्वेदी त्रिभागे
न समा करो वा ॥ १६ ॥ दिङ्मध्ये द्वारचतुष्टयं द्विहस्तं भवति ॥ तद्वारचतु
ष्टयं मध्यमोत्तमयोर्मंडपयोश्चतुरष्टांगुलवृद्धिमत् ॥ मध्ये मंडपे चतु राम
रंगुला वृद्धिः उत्तमे चाष्टांगुलवृद्धिः कार्या ॥ वेदीमंडपस्य तृतीयांशेन १४

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मध्ये कार्या मंडपे नवकोष्ठकृते सति मध्यकोष्ठे कार्या समा हस्तमात्रमु
च्चा कार्या ॥ अन्यत्र इष्टकाभिः कार्येत्युक्तं न केवलं समत्व साधनायेति व्या
ख्या ॥ पंचरात्रे ॥ कनिष्ठे द्विकरं द्वारं चतुरंगुलवर्धितः ॥ मध्यमोत्तमयोरि
ति ॥ क्रियासारे ॥ त्रिभागं मंडपं कृत्वा मध्यभागस्थवेदिका ॥ हस्तमात्रेत
दुत्सेधं चतुरस्रं समं ततः ॥ वसिष्ठोपि ॥ हस्तोन्नतां च विस्तीर्णामिति म
त्स्यपुराणादिषु ॥ यद्वेदिमानमन्यथा तत्कर्म विशेषे ज्ञेयं ॥ सिद्धांतशेख
रे तु विशेषः ॥ वेदी चतुर्विधा प्रोक्ता चतुरस्रा च पद्मिनी २ ॥ श्रीधरी ३ सर्व
तोभद्रा ४ । दीक्षास्थापनादिषु ॥ चतुरस्रा चतुःकोणा वेदी सर्वफलप्रदा ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कुंड तडागादिप्रतिष्ठायां पद्मिनीपद्मसन्निभा ॥ राज्ञां स्यात्सर्वतोभद्रा चतुर्भद्रा सिद्धि
भिषेचने ॥ विवाहे श्रीधरी वेदी विंशत्यस्रसमन्विता ॥ दर्पणोदरसंकाशानि
म्नोन्नतविवर्जिता ॥ अथ तुलापुरुषदाने विशेषमाह ॥ तुलाप्रदाने धमम
ध्ययोः सा स्यात्पंचहस्तोत्तमके द्वि८ हस्ता ॥ ईशानभागेग्रहवेदिकापि हस्तो
न्मितो छायवतीत्रिवप्रा ॥ १८ ॥ तुलापुरुषदाने अधममध्यमंडपयोः पंच
हस्ता उत्तममंडपे सप्तहस्ता भवति मंडपस्येशानभागे ग्रहवेदी कापि हस्ता
याम दीर्घोछ्रायात्रिवप्रा भवतीति व्याख्या ॥ मात्स्ये ॥ पंचहस्ता भवेद्वेदी स राम
प्तहस्ताथवा भवेत् ॥ अत्राधममध्यमयोः पंचहस्ता उत्तमे सप्तहस्तेति ॥ १५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

निबंधृभिर्व्रीवस्थापितं ॥ मंडपस्येशानभागेग्रहवेदीकरोमितेति ॥ अथ
स्तंभप्रवेशनं भुजंगप्रयातशालिनीभ्यामाह ॥ समत्रित्रिभागेच सूत्रंप्र
दद्याद्दुदग्दक्षिणंचापि पूर्वापरंच ॥ ततस्त्र्यंशपूर्तौ च कोणेषुदद्यात्समस्त
म्भकान्द्वादशैवेषु हस्तान् ॥ वेद्याः कोणे हस्ति हस्तोच्चवेदस्तंभान्दद्याद्दक्षि
दिग्गतः सचूडान् ॥ प्रादक्षिण्यात्संचमांशं तुभूमौ दद्यादेवं षोडशस्तंभ
संस्था ॥ १८ ॥ समेतृतीयांशे पूर्वापरं दक्षिणोत्तरंचापिसूत्रं दद्यात् ॥ एवं न
वकोष्ठात्मको मंडपो भवति ततस्तृतीयांशाते ष्वष्टसु चतुर्षुबहिः कोणे
षु चत्रुभान्द्रढान्यत्र दक्षोद्भवान्पंच हस्तप्रमाणान्द्वादशस्तंभान्दद्या

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

न्‌ धारयेत्‌ वेद्याः कोणेषु अष्टहस्तप्रमाणान्‌ चतुरस्तंभान्स चूडांस्ता
दृशानेवाग्नेर्दिक्क्रमः प्रादक्षिण्येन दध्याडोपयेत्‌ स्तंभपंचमांशं भूमौ नि
खनेदेवं कृते षोडशास्तंभस्थापनं भवतीति व्याख्या पंचरात्रे मंडपार्द्धो
च्छ्रितान्द्वादशसंख्यां श्चूडान्वितांस्तथा स्तंभान्समं च संस्थाप्य स्तंभद्वादश
कं पुनः बाह्ये प्युक्तप्रकारेण तत्र तत्र विभागतः अत्र यद्यपि साधारण्ये
न मंडपार्धोच्छ्रितानित्युक्तं तथापि षोडशहस्तमंडपार्धेनैवेति विज्ञेयं
सर्वमुख्यस्य षोडशहस्तस्यैव सर्वत्रोक्तत्वात्‌ यच्चारदातिलके षोडश
स्तंभसंयुक्तं चत्वारस्तेषु मध्यगाः अष्टहस्तसमुच्छ्राया इति वेदिसंख्या

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

चूडान्विता स्तथेति ॥ वाक्याच्चतुर्षु वेदिकोणगेषु स्तंभेषु चूडानियमः ॥
अन्येषु द्वारदेशेषु कर्णा श्चूडा वा कार्या ॥ अन्यच्च ॥ स्तंभो च्छायैश्शिलान्यासे
सूत्रयोजनकीलके ॥ खननावृटसंस्कारे प्रारंभो वह्निगोचरः इति वास्तु
शास्त्रे ॥ पंचमांशं न्यसेद्भूमौ सर्वसाधारणो विधिः ॥ अथ स्तंभोपरिकाष्ठ
निवेशनं ईड्वज्ञ याह ॥ स्तंभेषु तिर्यग्वलिकानिधेया श्चूडास्तु कर्णे ष्व
थवा बहिस्थाः ॥ पौर्वापरं दक्षिणसौम्यदिक्स्थं कोणंतरा काष्टचयं निद
ध्यात् ॥ १९ प्रथमं चतुर्षु स्तंभेषु वेदिकोणगेषु वलिकाख्यं काष्टचतुष्ट
यं प्रांते छिद्रवन्निधेयं ॥ तत्र पूर्वापरं द्वयं दक्षिणोत्तरं द्वयं च चूडास्तु निदध्यात् ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कुं ड तिर्यक्कृनिहितस्य काष्ठस्य वलिकेति संज्ञा ॥ एवं द्वादशस्वपि बाह्येषु स्तं सिद्धि
भेषु कर्णेषु वा चूलिकावलिकाकाष्ठानि निधेयानि ॥ ततो मध्यस्तंभ चूडा
तः पूर्वापरमेकं दक्षिणोत्तरमेकं कोणे चैकं काष्ठं समतया स्थापयेदिति
॥ एवं चतुर्ष्वपि स्तंभेषु द्वादशकाष्ठानि भवंति ॥ ततो मध्ये चकाष्ठानि स
कर्णानि देयानीति व्याख्या ॥ अथ मंडपाच्छादनं रथोद्धतयाह ॥ मध्यभा
गशिखरं रचयित्वाच्छादयेदपि कटैरुजुवंशैः ॥ द्वारवर्ज्यमिह मंडपमे
नं स्तंभकानपि स्फवस्त्रसमूहैः ॥ २७ वेदिस्तंभोपरि शिखराकारं रचनां राम
कृत्वा एनं मंडपं द्वारवर्जितं कटैरुजुवंशैश्च छादयेत् ॥ षोडशापि स्तंभा १७

त्क्रवस्त्रसमूहैर्दुकूलादिभिश्छादयेत् इति व्याख्याक्रियासारे ॥ नारि
केलीदलैर्वापि पल्लवैर्वाथ वेणुभिः ॥ आच्छाद्यामंडपाः सर्वे द्वारवर्ज्यं तु
सर्वतः ॥ वास्तुशास्त्रे ॥ कृतोसद्भिस्तुसंछाद्या विजयाद्वास्तुमंडपा इति
॥ हयग्रीवपंचरात्रे ॥ दर्पणैश्चामरैर्घंटैः स्तंभान्वस्त्रैर्विभूषयेदिति ॥
अथ वसंततिलकभा तोरणान्याह ॥ पूर्वादिदिक्षु रचयेदपि तोरणानि
न्यग्रोधजं तु फल पिप्पलवृक्षराजैः ॥ अश्वत्थजं तु फलपर्कटि भूरिपद्मि
वैषामभावत इमान्यथवैककेन ॥ २१ पूर्वादिदिक्षु वटोदुंबराश्वत्थप्ल
क्षैस्तोरणानि रचयेत् ॥ अथवाश्वत्थोदुंबरप्लक्षवटै रचयेत् ॥ एषां वृक्षा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

णामभावेद्इमानितोरणानिएकेनैववृक्षेणेवयथोपपन्नेनरचयेदिति

व्याख्या॥ महाकपिलपंचरात्रे॥ देवास्तोरणरूपेण संस्थितायज्ञमंडपे॥

विघ्नविध्वंसनार्थायरक्षार्थमध्वरस्यच॥ न्यसेन्न्यग्रोधमैंद्र्यांतुयाम्यांचोदुं

बरंतथा॥ वारुण्यांपिप्पलंचैवकौबेर्यांप्लक्षकंन्यसेत्॥ अश्वत्थोदुंबरप्लक्ष

वटशाखाकृतानिच॥ मंडपस्यप्रतिदिशंद्वाराण्येतानिकारयेत्॥ द्वारा

कारताद्वारशाखप्रयोगः॥ पंचरात्रे॥ अलाभेप्येकमेवैषांसर्वाशास्त

निवेशयेदिति॥ सर्वाभावेशमीजंबूखदिराणामन्यतमेनकार्याणीति

॥ अथतोरणमानंनिवेशनंचविपरीताख्यानकपाह॥ हस्ताद्धहि

ॐ ६ | सिद्धि | राम | १८

मंडपतः शरां१ग६ रुचरैः७करैस्तान्यधमादिकेषु॥ दीर्घाणि च प्राहुरथा
यतिः स्यात्तेषां द्विहस्ता चरणप्रवृध्या॥ २२॥ मंडपान्मंडपद्वाराद्बहिर्हस्त
मात्रे तानि तोरणानि पंचषट्सप्तहस्तदीर्घाणि अधमादिकेषु अधम
मध्यमोत्तमेषु मंडपेषु प्रवदंति॥ अथ तेषां तोरणानामायतिरायामो द्वि ५
हस्तश्चरणशब्देन अंगुलषट्केन वृध्या स हस्यात्॥ अधमे मंडपे द्विह
स्तायतिर्मध्यमे षडंगुलानि द्वौ हस्तौ उत्तमे सार्धहस्तद्वयमिति व्याख्या
आग्नेये॥ पंचषट्सप्तहस्तानि हस्तखातस्थितानि च॥ वास्तुशास्त्रे पंच
हस्तप्रमाणास्ते विस्तारेण द्विहस्तकाः॥ षडंगुलाधिका द्वाश्च सप्तहस्तास्त

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कुं ड

थोत्तमे ॥ अर्धान्नमध्य मंडपेषद्दस्तातोरणा इति ॥ अथफलकादिनिवेश
नं उपजातींद्रवज्राभ्यामाह ॥ स्तंभार्द्धमानं फलकं तु तिर्यक्कृन वे १३॥११वि
श्व १३ प्रमितांगुलाश्च ॥ तन्मूर्द्धि कीलाः स्वतुरीयभागान ताश्चमूला हृतय
श्च ते स्युः २३ ॥ तद्देशानं द्वित्रियुगांगुलानि शेषे तु विस्तार्यजनं गुलर्धैः ॥
कीलेषु शंखारिगदांबुजांकैश्चिशेषु भूलकिलतोरणेषु ॥ २४ ॥ स्तंभानां तो
रणस्तंभानां दशांगुलपरिणाहानामर्धेन तिर्यक् फलकं मुपांतयोः सछि
द्रं स्यात् ॥ फलकं नाम तोरणस्तंभोपरि तिर्यग्दीर्घमानं काष्टं पट्टिकेत्यपि
विधीयते ॥ अल्पमंडपतोरणे सार्धहस्तद्वयमितं मध्ये हस्तत्रयमितं उन
४ छिद्रंत्रोराप ४

सिद्धि
र्धि:
राम
१९

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रे सार्धत्रयहस्तमितं ॥ शैवे यागे चतुः फलकमस्तके त्रिशूलाकृतय ॥ नवैका
दशात्रयोदशांगुलदीर्घाः स्वचतुर्थांशेन विस्तृताः तेन सपादद्वयपादोन त्र
यसपादत्रयांगुलविस्तृताः स्वतोरणकाष्ठजाः कीलाः चत्वारो भवंति ॥
तेषां कीलानां फलकस्य मध्यभागे वेशानं द्वित्रिचतुरंगुलमितं अल्पम
ध्योत्तमेषु स्यान्मंडपेषु ॥ अथ विष्णुयागे ॥ पुनरंगुलार्धैरिति अधमादि
षु मंडपेषु दशाद्वादशांगुलचतुर्दशांगुलदीर्घाः स्वचतुर्थांशेन विस्तृता ॥
तेन सार्धद्वयेनैत्रिसार्धत्रयांगुलायामाः वेशनार्थं मध्ये लघुकीलेन
सहिताः प्रागादिक्रमेण शंखचक्रगदापद्मचिह्निताः कीलाः स्वतोरण

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

काष्ठभवाः फलकमध्येनिधेया ॥ तोरणस्तंभेष्वपि पंचमांशेनखननन
मिति व्याख्या ॥ शारदातिलके ॥ तिर्यक्फलकमानं स्यात्स्तंभानामर्धमा
नत इति मंत्रमुक्तावल्यां ॥ अग्रयोर्मध्यभागे च पट्टिकायां त्रिशूलकमि
ति पिंगलामते ॥ शूलेन चिह्निताः कार्या द्वारशाखास्तु मस्तके ॥ शूलेन वां
गुलं दैर्घ्यं तुरीयांशेन विस्तृतिः ॥ ऋजु वैमध्यमं शृंगं किंचिद्वक्रं तु पक्ष
योः ॥ प्रथमं तत्समाख्यातं द्व्यंगुलं रोपयेत्तथा ॥ शेषाणां द्व्यंगुली । हद्धिर्वे
शाखांगुलवृद्धित इति ॥ वास्तुशास्त्रे ॥ मस्तके द्वादशांशेन शंखचक्रगदां
बुजं ॥ प्रागादिक्रमयोगेन न्यसेत्तं ॥ बांस्य दारुण इति ॥ अत्र द्वादशाशाखा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नामे वकैश्चित्फलकेदारशांशेनेत्युक्तंतद्सत् ॥ शाखाः प्रकृत्यैवफल
कारीनामानीत्युक्तेः ॥ मूलान्यपितद्वद्भवानीति व्याख्यं शांखादिस्थानी
यत्वात् ॥ पंचमांशंन्यसेद्भूमौ सर्वसाधारणोविधिरिति ॥ अथमंडपवर्णन
व्याजेनमंडपालंकरणानि वदन्मंडपकर्तृभ्यः आशिषं शार्दूलविक्रीडि
तेनप्रयच्छति ॥ उद्यत्पत्रफलातिनम्रविलसद्भासित्रालिंगितस्तंभोने
कद्लैरसालविटपैः सर्वत्रसंवेष्टितः ॥ राजच्चामरसंप्रबद्धमुकुरोदंच
द्वितानान्वितोयुक्तः पुष्पफलैः फलायभवतांभूयान्महामंडपः ॥ २५
उद्यंतिउर्ध्वीभवंतिपत्राणियासांतास्तथाफलैरतिनम्राविलसंत्यःको

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ऊ६ मला एतादृश्यो या रंभाः कदल्यस्ताभिरालिंगितास्तंभाः यस्य सस्तंभ सि॰
मूले धृत तादृशो कदलीकः ॥ बहुपत्रैराम्रपल्लवैः सर्वत्र कृतवेष्टनः ॥ राजं
ति चामराणि यस्मिंस्तादृशः सम्यक्स्रबद्धा ॥ मुकुरा आदर्शा यस्मिंस्तादृशः
सन्नुदर्चंति उपरि विलसंति एतादृशानि वितानानि तैरंजितोन्वितः ॥ पुष्पा
णि चंपकजाती मालती मल्लिका कुमुदादीनि फलानि जंबीर दाडिम कद
ली नारिकेल पूगीफलादीनि तैरन्वितः ॥ एतादृशो यं महामंडपः उत्तम
फलप्राप्तये भूयादिति व्याख्या ॥ सिद्धांतशेखरे ॥ चूतपल्लवमालाढ्यं विता राम
नै रूपशोभितं ॥ विचित्रवस्त्रसंछन्नं पट्टकूलविभूषितं ॥ सफलैः कदली २१

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्तंभैः क्रमुकैर्नारिकेलजैः ॥ फलैर्नानाविधैर्भोज्यैर्दर्पणैश्चामरैरपि ॥
भूषितं मंडपं कुर्याद्रत्नपुष्पसमुज्ज्वलमिति ॥ अन्यथा भावे पंचरात्रे दोष
उक्तः ॥ अनुक्तसाधनैः क्लृप्तो यदि वा कुटिलाकृतिः ॥ मानाधिकोथवान्यू
नो मंडपः कर्तृनाशनः ॥ यथोक्ते कृते मंडपे फलाधिक्यं न चैव ॥ आख्यात
साधनैः क्लृप्तः सरलः सममानकः ॥ मनोज्ञो मंडपो यो सौ कर्मकर्तुः शुभाव
ह इति ॥ अथ ध्वजनिवेशनं विपरीताख्यानकयाह ॥ ध्वजान्दिहस्तायतिकां
श्चपंचहस्तान्क्रमपीतारक्तकृष्णनीलान् ॥ श्वेतासितश्वेतमितान्दिगीशा
वाहान्वहेद्दिक्कर वंशशीर्षे ॥ २ध्व ॥ ध्वजान्दिहस्तामिता यामान्यं च हस्तद्दी

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कुं ६ घान्स नातारण कुसुम नील श्वेत कुसुम श्वेत श्वेतान् ॥ गौरि कादि लिखितदिक्पा शि॰
लवाहनान् ॥ दशहस्तवंशमस्तके योजितान् हस्तद्वयनिखातान् ध्वजांस्तान्
अपि पूर्ववैत इति वक्ष्यमाणत्वात्प्राच्यादितआवहेद्वारयेदिति व्याख्यानमि
धासारसंग्रहे ॥ पीतारक्तादिवर्णाश्चपंचहस्ता ध्वजाः स्मृताः ॥ द्विपंचह
स्तैर्दंडैस्तैर्वंशजैः संयुता मता इति क्रियासारे ॥ मातंगवृषभमहिषसिंह
मत्स्यैणवाजिनं ॥ वृषभं च यथान्याय्यं ध्वजमध्ये तु नालिखेत् ॥ पंचांशेन
खनेदिति ॥ अकरणे दोषः पंचरात्रे ॥ चिंतयंत्यसुरश्रेष्ठा ध्वजहीनं सुरा राम
लयं ॥ ध्वजेन रहिते ब्रह्मन्मंडपे तु वृथा भवेत् ॥ पूजाहोमादिकं सर्वं जपा २२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

घंयत्कृतंबुधैरिति ॥ ध्वजारोपणाफलंतत्रैव ॥ यंकृत्वापुरुषःसम्यक्स
मस्तफलमाप्नुयारिति ॥ अथपताकानिवेशनंमाहाध्वजनिवेशनंनव
मकुंडपताकानिवेशनंचेंद्रवज्रानुष्टुभ्यामाह ॥ लोकेशवर्णास्त्वपुताः
पताकाशैलेंद्रदैर्घ्यायतिकाश्चमध्ये ॥ चित्रंध्वजंदैर्घ्यवंशंविदोस्ततंपो
तेगाकिंकिणीकं ॥ २७ ॥ श्वेताचनवमीपूर्वेशानयोर्मध्यतोबुधः ॥ विन्यसे
त्तुपताकांचध्वजांस्ताअपिपूर्ववत ॥ २८ ॥ लोकेशानांलोकपालानांयेवर्णा
पीतादयःपूर्वश्लोकोक्ताःगैरिकादिलिखितवज्रशक्तिदंडखड्गपाशांकु
शगदात्रिशूलानितेपुताःसप्तहस्तदीर्घाःएकहस्तविस्तृताःपाताकाः

दिक्कुर

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कुं०द

शहस्तवंशशीर्षगाः चित्रध्वजं त्रिहस्तविस्तृतं प्रांते वर्त्तमानकिंकिणीकं सिद्धि
शीर्षे सचामरं दशहस्तदैर्घ्यं वंशं नताद्दशं तं मध्ये विन्यसेत्॥ पूर्वादितः
पताकाश्च विन्यसेदित्युत्तरश्लोकेनान्वयः॥ नवमीं पताकां पूर्वेशानयोर्म
ध्ये श्वेतां तादृशीमेवाचार्यकुंडे विन्यसेत्॥ ध्वजान्ता अपि पताकाः पूर्वा
दिक्रमेण भूमौ पंचांशारोपणेन विन्यसेत इति व्याख्या॥ तदुक्तं सारसंग्र
हे॥ प्रतिकुंडं पताकास्तु प्रोक्ताः शास्त्रार्थकोविदैः॥ सप्तहस्ताः पताकास्युः स
मांशेन च विस्तृताः॥ लोकपालानुवर्णेन नवमी तु हिनप्रभा॥ पताकाश्च रामं
ध्वजाश्चापि गंधपुष्पसमन्विता इति॥ परशुरामः॥ त्रिहस्ताविततोद्दीर्घा २३

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दशाहस्तोविचित्रितः॥ चामरेणान्वितः शीर्षे प्रांतेपक्षक इव घंटिकः॥ दश
हस्तोच्छ्रितो दंडे पुष्पगंधैः समन्वित इति॥ अथ कुंडनिवेशानं विपरीताख्या
नक्याह॥ प्राच्यां चतुःकोण भगेंदुरस्त्रं ड त्रिकोण वृत्तां गम्भजांबुजानि॥ अ
ष्टास्त्रि शक्रेश्वरयोस्तु मध्ये वेदास्त्रि वा वृत्तमुशंति कुंडं॥ २१॥ प्राचीतआर वृं
भ्य चतुरस्त्र योनिहृता ई त्रिकोण वृत्त षडस्त्रि पद्माष्टास्त्रि कुंडानि भवंति॥
प्राचीशानयोर्मध्ये नवममाचार्य कुंडं स्यात्॥ तच्चतुरस्त्रं वृत्तं चेति व्याख्या
॥ शारदातिलके॥ अष्टास्वाशासु रम्याणि कुंडान्येतान्यनुक्रमात्॥ चतुर
स्त्रं योनिमध्यं चं इ त्र्यस्त्रं च वर्तुलं॥ षडस्त्रं पंकजाकारं अष्टास्त्रं तानि नामतः॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

आचार्यकुंडं मध्ये स्याद्गौरीपतिमहेंद्रयोरिति॥ सिद्धांतशेखरे॥ पुरंदरे
शयोर्मध्ये वृत्तं वा चतुरस्रकं॥ तदाचार्यविनिर्दिष्टं अयमुत्तमः पक्षः॥ अथ
पंचकुंड्येककुंडनिवेशनमिंद्रवज्रयाह॥ आशेशकुंडैरिह पंचकुंडी चैकं
यदापश्चिमसोमशैवे॥ वेद्याः सपादेनकरेण यद्वा पदांतरेणाखिलकुंडसं
स्था॥ ३०॥ आशादिकु तत्र कुंडानि चतुरस्रवृत्तार्धवृत्तपद्मानि ईशानदिशि
कुंडं चतुरस्रं वृत्तं वा तैः पंचकुंडीनिवेशनं स्यात्॥ यदा चैकमेव कुंडं तदा
पश्चिमे उत्तरे ईशान्यां वा स्यात्॥ परं तु चतुरस्रं॥ वेद्याः सकाशात् तानि सर्वा
णि कुंडानि सपादेन करेण त्रिंशदंगुलांतरेण वा पादांतरेण द्वादशांगुलांत

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रणं भवतीति व्याख्या ॥ नारदीये ॥ यत्रोपदिश्यते कुंडं चतुष्कं तत्र कर्मणि ॥
वेदास्रमर्धचंद्रं च हृत्तं पद्मनिभं तथा ॥ कुर्यात्कुंडानि चत्वारि प्राच्यादिषु वि
चक्षणः ॥ पंचमं कारयेत्कुंडमीशादिग्गोचरं द्विजः ॥ अयं मध्यमः पक्षः ॥ के
श्चित्पूर्वेशयोरिति लिखितं तत्र सत्वरं इति ॥ सोमशंभो ॥ एकं वा शिवकाष्ठायां
प्रतीच्यां कारयेद्बुधः ॥ आचार्या अपि ॥ अथवा दिशि कुंडमुत्तरस्यां प्रविदध्या
च्चतुरस्रमेकमेवेति अयं कनिष्ठः पक्षः ॥ नवग्रहाधिकारे ज्योतिर्वसिष्ठ
संहितायां ॥ कुंडं तन्मध्यभागे तु कारयेच्चतुरस्रकं ॥ वितस्तिद्वयखातं तं कुं २
डं सच्चतुरंगुलमिति ॥ वेदीपार्श्वांतरं त्यक्त्वा कुंडानि नव पंच चेति नारदीये ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कुंड

कुंडवेद्यंतरं चैव सपाद करसंमितमिति केचित्रयोदशांगुलमप्यंतरमु
क्तमिति तत्र मंडपानुसारेण व्यवस्था॥ अथ वर्णविशेषस्त्रीणां च कुंडविशे
षं शालिन्याह॥ विप्रात्क्षत्रस्त्र्यस्त्रं च वृत्तं च वृत्तार्धं च स्यात्त्रिस्याद्वृद्धकोणानिवा
पि॥ सर्वाण्याहुर्वृत्तरूपाणिचान्ये योन्याकाराण्यंगनानां तु तानि॥ ३१॥ ब्रा
ह्मणादारभ्य ब्राह्मणक्षत्रियवैश्यशूद्राणां क्रमेण चतुःकोण वृत्तवृत्तार्द्ध
त्रिकोणानि भवंति अथवा सर्वेषां चतुःकोणानि वा वर्तुलानि वा सर्वाणि भ
वंति॥ स्त्रीयजमानके योन्याकाराणि भवंतीति व्याख्या॥ शारदातिलके॥
विप्राणां चतुरस्रं स्यात्राज्ञां वर्तुलमिष्यते॥ वैश्यानामर्धचंद्राभं शूद्राणां

सिद्धि

राम
२५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्र्यस्रमीरितं ॥ चतुरस्रं तु सर्वेषां केचिदिच्छंति तांत्रिकाः ॥ पंचरात्रे ॥ सर्वाणि
तानि हत्वानि चतुरस्राणि वा स्मृदेति ॥ सनत्कुमारः ॥ स्त्रीणां कुंडानि विप्रेंद्र
योन्याकाराणि कारयेत् ॥ अथ वा प्राच्यादिकुंडेषु फलविशेषमाह ॥ सिद्धिः
पुत्राः शुभं शत्रुनाशः शांतिर्मृतिच्छिदे ॥ वृष्टिरारोग्यमुक्तिर्हि फलं प्राच्यादि
कुंडके ॥ ३२ प्राच्यादिकुंडेष्वष्टसु अष्टौ फलानि स्युरिति शारदायां ॥ सर्वसि
द्धिकरं कुंडं चतुरस्रमुदाहृतं ॥ पुत्रप्रदं योनिकुंडं मर्धचंद्रं शुभप्रदं ॥ श
त्रुक्षयकरं त्र्यस्रं वर्तुलं शांतिकर्मणि ॥ छेदमारणयोः षड्स्रं षडस्रं पद्मस
न्निभं ॥ वृष्टिदं रोगशमनं कुंडमष्टास्रमीरितं ॥ कामिके तु फलांतरे ॥ द्या

कुंड

स्तंभे चतुःकोणं अग्नौ भागे भगाकृतिं ॥ चंद्रार्धं मारणे याम्ये द्वेषे त्र्यस्रं सिद्धि
तु नैरृते ॥ वारुण्यां शांतिके वृत्तं षडस्रमुच्चाटने निले ॥ उदीच्यां पुष्टिके प
द्मं रौद्र्यामष्टास्रि भुक्तिदं इति ॥ अथ होमसंख्यायाः कुंडमानं शिखरि
ण्याह ॥ शतार्धे रत्निः स्यात् शतपरिमिते रत्निविततं सहस्रे हस्तः स्यादयु
तहवने हस्तयुगलं ॥ चतुर्हस्तं लक्षे प्रयुतहवने षड्करमितैः कुकुंडैर्वा को
टौ नृपकरमपि प्राहुरपरे ॥ ७ ॥ शतार्धमितेपं चाशन्मिते होमे रत्निमि
तं कुंडं ॥ शतमिते अरत्निमितं ॥ सहस्रहोमे हस्तमितं ॥ दशसहस्रमिते राम
द्विहस्तं ॥ लक्षहोमे चतुर्हस्तं ॥ दशलक्षहोमे षड्हस्तं ॥ कोटिहोमे ष्ट हस्त २६

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मितं वा स्याद्धस्तमितं वा लक्षहोमे षोडशकरमपि प्राहुरिति व्याख्या ॥ भविष्य
पुराणे ॥ मुष्टिमात्रं शतार्द्धे तु शते चारत्निमात्रकं ॥ सहस्रे तत्र होतव्ये कुंडं
कार्यं करात्मकं ॥ द्विहस्तमयुते तद्वल्लक्षहोमे चतुःकरं ॥ दशलक्षमिते
होमे षट्करं संप्रचक्षते ॥ अष्टहस्तात्मकं कुंडं कोटिहोमेषु नाधिकं ॥ शा
रदायां ॥ दशहस्तमितं कुंडं कोटिहोमेपि शस्यते ॥ स्कांदे ॥ कोटिहोमे चतु
र्हस्तं चतुरस्रं समंततः ॥ योनिवक्त्रद्वयोपेतं तदप्याहुस्त्रिमेखलमिति ॥ इ
दं चापरस्थूलहस्तविषयं ॥ जयकेनाचिन्मते कुंडमानमुपजातिकयाह ॥
लक्षैकरद्व्याद्यगुणं क्रमात्तं करेषु वृद्ध्या दशहस्तकं च ॥ कोट्या धरादिग्विदशांति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कुंड

लक्षलक्षदले मुनी७ष५तुं६हशान्तु३हस्तो ॥३४॥ लक्षस्यैकद्व्याद्यादश

लक्षकाणामेतं समाप्तिमर्यादी कृत्येत्यादि दशलक्षकांतं एकलक्षमार

भ्य लक्षद्व्याद्यादशलक्षपर्यंतमित्यर्थः ॥ करस्य एकद्व्याद्यादशहस्तकं मर्या

दीकृत्येत्यादशहस्तकं एककरमारभ्य एककरद्व्यादशहस्तं यावत्कुंडं

प्राहुरिति पूर्वेणान्वयः ॥ कोटरर्धपंचाशल्लक्षे दशलक्षे विंशतिलक्षे लक्ष

दले पंचाशत्सहस्रे क्रमात्सप्तपंचषट्त्रिकरं कुंडमिति व्याख्या ॥ शारदा

यां ॥ एकहस्तमितं कुंडं लक्षहोमे विधीयते ॥ लक्षाणां दशकं यावत्तावद्धस्तेन

न वर्द्धयेत् ॥ सिद्धांतशेखरे ॥ लक्षार्धे त्रिकरं कुंडं लक्षहोमे चतुःकरं ॥ कुंडं

सिद्धि

राम

२०

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पंचकरं प्रोक्तं दशालक्षाद्धुतो क्रमात् ॥ षट्हस्तं लक्षविंशत्यां कोट्यर्धे सप्त
हस्तकं इति ॥ इदमेव कुंडमानं कामिकादिमतसिद्धांतशेखरशारदाहेमा
द्रिप्रमुखैः प्राचीनै रामवाजपेयि राघवभट्ट कुंडरत्नाकर कुंडकौमुदीका
